राजनि० । शा० स० । ६स्वादौ रसे । ६ब० । ७सुस्वादुरसयुक्ते त्रि० । ८तुलस्यां पुंस्त्री० । ९रास्नायां १०नागमातरि स्त्री मेदि० । ११निर्गुण्ड्यां शब्दच० १२ब्राह्म्यां रत्नमा० १३महाशतावर्य्यां च स्त्री राजनि० । नागमाता च कश्यपपत्नीभेदः । "अदितिर्दितिर्दनुश्चैव अरिष्टा सुरसा खसा" तत्पत्नीकथने हरिवं० ३अ० । "सुरसायाः सहस्रन्तु सर्पाणाममितौजसाम् । अनेकशिरसां तस्यां खेचराणां महात्मनाम्" । तत्राध्याये तस्या नागमातृत्वमुक्तम् । "सुरसाऽजनयन्नागान् कद्रुः पुत्रांश्च पन्नगान्" भा० आ० ६६अ० । तेनानेकशिरः नागप्रसूत्वं सुरसायाः कद्रास्तु सर्पमातृत्वमिति भेदः ।

**सुरसाष्ट** पु० सुरसाभिरष्टः व्याप्तः अश-व्याप्तौ कर्मणि क्त । "निर्गुण्डी तुलसी ब्राह्मी बृहती कण्टकारिका । पुनर्नवेति मुनिभिः सुरसाष्टः प्रकीर्त्तितः" शब्दचन्द्रिकोक्ते वृक्षभेदव्याप्ते औषधभेदे ।

[गिरीभेदे तन्त्रसा० ।

**सुरसुन्दरी** स्त्री सुरप्रिया सुन्दरी । १मेनकाद्यप्सरःसु २योगिनीभेदे तन्त्रसा० ।

**सुरा** स्त्री सुर-क सु-रक् वा । १मद्ये २चषके च मेदि० । सुरा च मद्यभेदः मद्यशब्दे ४७२६ पृ० दृश्यम् । सौत्रामणीशब्दे वैदिकमार्गेण तदभिषवप्रकारादिर्दृश्यः ।

**सुराकर** पु० सुराया आकरः । मद्योत्पत्तिस्थाने ।

**सुराचार्य्य** पु० ६त० । बृहस्पतौ अमरः ।

**सुराजक** सुष्ठु राजते राज-ण्वुल् । १भृङ्गराजे शब्दच० । ६ब० कप् । सुन्दरराजान्विते त्रि० ।

**सुराजन्** पु० सुष्ठु पूजितो राजा न टच्समा० । १सुन्दरे राजनि० ६ब० । २सुन्दरराजस्वामिके देशे त्रि० ।

**सुराजीविन्** पु० सुरां सुरासम्पादनमाजीवति आ+जीव णिनि । शौण्डिके हेमच० ।

**सुराप** त्रि० सुरां पिबति पा-क । १मद्यपानकारके "सुरापः स्यावदन्तकः" इति शाता० । [दयोऽप्यत्र ।

**सुरापगा** स्त्री ६त० । गङ्गायाम् जटा० । सुरतरङ्गिण्या-

**सुरापान(ण)** न० सुरा पीयतेऽनेन पा-करणे ल्युट् वा णत्वम् । १अवदंशे (चाटनी) सुरायाः पानं येषां णत्वम् । २प्राच्यदेशस्थे जने पु० शब्दच० । भावे ल्युट् । ३तत्पाने न० वा णत्वम् ।

[सुराग्रभागोऽप्यत्र

**सुराभाग** पु० सुराया भागः अग्रभागः । सुरामण्डे शब्दच०

**सुरामण्ड** पु० ६त० । सुराया अग्रभागे अमरः ।

**सुरारि** पु० ६त० । असुरे शब्दर० ।

**सुरारिहन्तृ** पु० सुराणामरिं हन्ति हन-तृच् । विष्णौ ।

**सुरार्ह** न० सुरान् देवानर्हति अर्ह-अण् । हरिचन्दने राजनि० ।

**सुरालय** पु० ६त० । १सुमेरुपर्वते अमरः । २स्वर्गस्थाने च ।

**सुराष्ट्र** पु० ६ब० । देशभेदे (सुरट) । सोऽभिजनोऽस्य तस्य राजा वा अण् । सौराष्ट्र पित्रादिक्रमेण तद्देशवासिनि जने तद्भूपे च बहुषु अणो लुक् । तत्र भवः अण् । तद्देशभवे त्रि० स्त्रियां ङीप् ।

**सुराष्ट्रज** न० स्त्री० सुराष्ट्रदेशे जायते जन-ड । १तुवरिकायाम् अमरः २कृष्णमुद्गे राजनि० । ३विषभेदे च पु० शब्दच० । ४तद्देशजातमात्रे त्रि० ।

**सुराह्व** पु० सुरपूर्विका आह्वा यस्य सुरान् आह्वयति गन्धेन वा आ+ह्वे-क वा । १देवदारुवृक्षे शब्दर० । २मरुवके ३हरिद्रावृक्षे च राजनि० ।

**सुरुङ्ग** पु० सु+रुज-अङ्गच् पृषो० । १शोभाञ्जनवृक्षे शब्दर० । २सुरुङ्गायां (सिँध) स्त्री जटा० ।

**सुरुङ्गाहि** पु० सुरुङ्गायामहिरिव । सन्धिचौरे शब्दर० ।

**सुरूप** न० सुन्दरं रूपमस्य । १तूले राजनि० । २सुन्दररूपयुते त्रि० सुरूपाश्च प्रसिद्धतया कतिचित् कविक० उक्ता यथा "सुरूपाश्चैव विख्याता नकुलस्य पुरूरवाः । कामदेवश्च शाम्बश्च विख्याता वाश्विनौ तथा । नलकूवरः सुरूपेषु लोकेषु तु मता इमे" ३पण्डिते पु० जटा० । ४शालपर्ण्यां ५भार्ग्याम् च स्त्री राजनि० शा० स० । ६सुन्दरे रूपे न० ।

**सुरूहक** पु० सु+रुह-क्वुन् पृषो० । गर्दभाण्डे हेमच० ।

**सुरेज्य** पु० इज्यते पूज्यते यज-क्यप् ६त० । १बृहस्पतौ २तुलस्यां स्त्री राजनि० ।

**सुरेन्द्र** पु० सुरेषु इन्द्र ऐश्वर्य्ययुतः । सुरराजे इन्द्रे ।

**सुरेन्द्रजित्** पु० सुरेन्द्रं जितवान् जि-भूते क्विप् । गरुडे हला० तत्कथा भा० आ० ३२अ० दृश्या ।

**सुरेभ** न० सु+रेभ-अच् । रङ्गे धातौ (रांग) त्रिका० ।

**सुरेवट** पु० सुष्ठु रेवटः सु+रेव-अटन् वा । राजपूगे त्रिका० ।

**सुरेश्वर** पु० सुराणामीश्वरः । १रुद्रे जटा० २इन्द्रे च ३स्वर्गगङ्गायां स्त्री शब्दर० ४दुर्गायाञ्च ङीप् ।

**सुरेष्ट** पु० ६त० । १शालवृक्षे २सुरपुन्नागे ३शिवमल्लिकायाम् ४ब्राह्म्यां स्त्री राजनि० ।

**सुरोत्तम** पु० सुरेषूत्तमः । १सूर्य्ये २देवश्रेष्ठे त्रि० ।

**सुरोत्तर** पु० सुरेषु तत्पूजनेषूत्तरः श्रेष्ठः । चन्दने शब्दच० ।

**सुरोद** पु० सुरेव उदकमस्य उदादेशः । सुरासमुद्रे जटा० ।

**सुलभ** त्रि० सुखेन लभ्यते सु+लभ-कर्मणि खल् । १अना-